# .. bhRigu sUtram ..

# ॥ भृगु सूत्रम् ॥

अथ तन्वादिद्वादशभावस्थितरविफलमाह
तत्रादौ लग्ने रविफलम्

आरोग्यं भवति ॥ १॥
पित्तप्रकृतिः नेत्ररोगी ॥ २॥
मेधावी सदाचारी वा ॥ ३॥
उष्नोदरवान् ॥ ४॥
मूर्खः पुत्रहीनः ॥ ५॥
तिक्ष्नबुद्धिः ॥ ६॥
अल्पभाषी प्रवासशीलः सुखी ॥ ७॥
स्वोच्चे कीर्तिमान् ॥ ८॥
बलिनिरीक्षिते विद्वान् ॥ ९॥
नीचे प्रतापवान् ॥ १०॥
जानद्वेषी दरिद्रः अन्धकः ॥ ११॥
शुभदृष्टे न दोषः ॥ १२॥
सिंहे स्वांशे नाथह् ॥ १३॥
कुलीरे जानवान् ॥ १४॥
रोगी बुदबुदाक्षह् ॥ १५॥
मकरो हृद्रोगी ॥ १६॥
मीने स्त्रीजनसेवी ॥ १७॥
कन्यायां रवौ कन्याप्रजः दारहीनः कृतघ्नः ॥ १८॥
क्षेत्री शुभयुक्तह् आरोग्यवान् ॥ १९॥
पापयुते शत्रुनीछक्षेत्रे तृतीये वर्षे ज्वरपीडा ॥ २०॥
शुभदृष्टे न दोषः ॥ २१॥

लग्नाद् द्वितीये रविफलम्

मुखरोगी ॥ २२॥
पंछविंशतिवर्षे राजदन्डेन द्रव्यच्छेदः ॥ २३॥
उच्चे स्वक्षेत्रे वा दोषः ॥ २४॥
पापयुते नेत्ररोगी ॥ २५॥

स्वल्पविद्वान् रोगी ॥ २६ ॥
शुभवीक्षिते धनवान् दोषादीन् व्यपहरती ॥ २७ ॥
नेत्रसौख्यम् ॥ २८ ॥
स्वोच्चे स्वक्षेत्रे वा बहुधनवान् ॥ २९ ॥
बुधयुते पवनवाक् ॥ ३० ॥
धनाधिपः स्वोच्चे वाग्मी ॥ ३१ ॥
शास्त्रजः जानवान् नेत्रसौख्यम् राजयोगश्छ ॥ ३२ ॥

लग्नातृतीये रविफलम्

बुद्धिमान् अनुजरहितः ज्येष्ठनाशः ॥ ३३ ॥
पंचमे वर्षे चतुरश्टद्वादशवर्षे वा किंचित्पीदा ॥ ३४ ॥
पापयुते क्रूरकर्ता ॥ ३५ ॥
द्विभ्रातृमान् पराक्रमी ॥ ३६ ॥
युद्धे शूरश्च ॥ ३७ ॥
कीर्तिमान् निजधनभोगी ॥ ३८ ॥
शुभयुते सोदरवृद्दिः ॥ ३९ ॥
भावाधिपे बलयुते भ्रातृदीर्घयुः ॥ ४० ॥
पापयुते पापेक्षणवंशान्नाशः ॥ ४१ ॥
शुभवीक्षनवशाद्धनवान् भोगी सुखी च ॥ ४२ ॥

लग्नाच्चतुर्थे रविफलम्

हीनांगः अहंकारी जनविरोधी उष्नदेही मनः पीडावान् ॥ ४३ ॥
द्वात्रिंशद्वर्षे सर्वकर्मनुकूलवान् ॥ ४४ ॥
बहुप्रतिष्ठासिद्धिः सत्तापदवीजानसौर्यसम्पन्नः ॥ ४५ ॥
धनधान्यहीनः ॥ ४६ ॥
भावाधिपे बलयुते स्वक्षेत्रेत्रिकोणे केन्द्रे लक्ष्नापेक्ष्या
आन्दोलिकाप्राप्तिः ॥ ४७ ॥
पापयुते पापविक्षनवशाद् दुष्टस्थाने दुर्वहनसिद्धिः ॥ ४८ ॥
क्षेत्रेहीनः ॥ ४९ ॥
परगृह एव वासः ॥ ५० ॥

लग्नात्पंचमे रविफलम्

निर्धनः स्थूलदेही सप्तमे वर्षे पित्रारिष्टवान् ॥ ५१ ॥

मेधावी अल्पुत्रः बुद्धिमान् ॥ ५२॥
भावाधिपे बलयुते पुत्रसिद्धिः ॥ ५३॥
राहुकेतुयुते सर्पशापात् सुतक्षयः ॥ ५४॥
कुजयुते शत्रुयुते मूलात् ॥ ५५॥
शुभदृष्टयुते न दोषः ॥ ५६॥
सूर्यशरभादिषु भक्तः ॥ ५७॥
बलयुते पुत्रसमृद्धिः ॥ ५८॥

लग्नात्षष्ठे रविफलम्

अल्पजातिः ॥ ५९॥
शत्रुवृद्धिः धनधान्यसमृद्धिः ॥ ६०॥
विंशतिवर्षे नेत्र वैपरीत्यं भवति ॥ ६१॥
शुभदृष्टयुते न दोषः ॥ ६२॥
अहिकानन पारकृन्मन्त्रसेवी ॥ ६३॥
कीर्तिमान् शोकरोगी महोष्नदेही ॥ ६४॥
शुभयुते भावाधिपे देहारोग्यम् ॥ ६५॥
जातिशत्रुबाहुल्यम् ॥ ६६॥
भावाधिपे दुर्बले शत्रुनाशः ॥ ६७॥
पितृदुर्बलः ॥ ६८॥

लग्नत्सप्तमे रविफलम्

विवाहविलम्बनं स्त्रीद्वेषी परदाररतह् दारद्वयवान् ॥ ६९॥
पञ्चविंशतिवर्षे देशान्तर प्रवेशः ॥ ७०॥
अभक्ष्य भक्षनः विनोदशीलः दारद्वेषी ॥ ७१॥
नाशान्तबुद्धिः ॥ ७२॥
स्वर्क्षेबलवति एकदारवान् ॥ ७३॥
शत्रुनीचवीक्षिते पापयुते वीक्षनैर्बहुदारवान् ॥ ७४॥

लग्नादष्टमे रविफलम्

अल्पपुत्रः नेत्ररोगी ॥ ७५॥
दशमे वर्षे शिरोव्रनी ॥ ७६॥
शुभयतुदृष्टे तत्परिहारह् ॥ ७७॥
अल्पधनवान् गोमहिष्यादिनाशः ॥ ७८॥

देहे रोगः ॥ ७९ ॥
ख्यातिमान् ॥ ८० ॥
भावाधिपे बलयुते इष्टक्षेत्रवान् ॥ ८१ ॥
स्वोच्चेस्वक्षेत्रे दीर्घयुः ॥ ८२ ॥

लग्नान्नवमे रविफलम्

सूर्यादिदेवताभक्तः ॥ ८३ ॥
धार्मिकः अल्पभाग्यः पितृद्वेषी सुतदारवान् स्वोच्चे
स्वक्षेत्रे तस्य पिता दीर्घयु ॥ ८४ ॥
बहुधनवान् तपोध्यानशीलः गुरूदेवताभक्तः ॥ ८५ ॥
निचारिपापक्षेत्रे पपैर्युते दृष्टे वा पितृनाशः ॥ ८६ ॥
शुभयुते वीक्षनवशाद्वा पिता दिर्घयुः ॥ ८७ ॥

लग्नाद्दशमे रविफलम्

अष्टादशवर्षे विद्यादिकारेन प्रसिद्धो भवति
द्रव्यार्जनसमर्थश्च ॥ ८८ ॥
दृष्टत्रितः राजप्रियः सत्कर्मरतः राजशूरः ख्यातिमान् ॥ ८९ ॥
स्वोच्चे स्वक्षेत्रे बल परः ॥ ९० ॥
कीर्तिप्रसिद्धिः ॥ ९१ ॥
तटाकक्षेत्रगोपुरादिब्राह्मण प्रतिष्टासिद्धिः ॥ ९२ ॥
पापक्षेत्रे पापयुते पापदृश्टवशात् कर्मविघ्नकरः ॥ ९३ ॥
दुष्टकृतिः ॥ ९४ ॥
अनाचारः दुष्कर्मकृत्पापी ॥ ९५ ॥

लग्नादेकादशे रविफलम्

बहुधान्यवान् पंचविंशतिवर्षे वाहनसिद्धिः ॥ ९६ ॥
धनवाग्जालद्रव्यार्जनसमर्थः प्रभुज्वरितबृत्यजनस्नेहः ॥ ९७ ॥
पापयुते बहुधान्यव्ययः ॥ ९८ ॥
वाहनहीनः ॥ ९९ ॥
स्वक्षेत्रे स्वोच्चे अधिकप्राबल्यम् ॥ १०० ॥
वाहनेशयुते बहुक्षेत्रे वित्ताधिकारः ॥ १०१ ॥
वाहनयोगेन न बहुभाग्यवान् ॥ १०२ ॥

लग्नाद्द्वादशे रविफलम्

षट्त्रिंशद्वर्षे गुल्मरोगी ॥ १०३ ॥
अपात्रव्ययकारी पतितः धनहानिः ॥ १०४ ॥
गोहत्यादोषकृत् परदेशवासी ॥ १०५ ॥
भावाधिपे बलयुते वा देवतासिद्धिः ॥ १०६ ॥
शय्याखट् वंगादिसौख्यम् ॥ १०७ ॥
पापयुते अपात्रव्ययकारी सुखशय्याहीनः ॥ १०८ ॥
षष्ठेशेयुते कुष्ठरोगयुतः शुभदृष्टयुते निवृत्तिः ॥ १०९ ॥
पापी रोगवृद्धिमान् ॥ ११० ॥

अथ तन्वादिद्वादशभावस्थितचन्द्रफलमाह
तत्रादौ लग्ने चन्द्रफलम्

रूपलावण्ययुक्तश्चपलः व्याधिना जलाच्चसौख्यः ॥ १ ॥
पंचदशवर्षे बहुयात्रावन् ॥ २ ॥
मेषवृषभकर्कलग्ने चन्द्रेशास्त्र परः ॥ ३ ॥
धनी सुखी नृपालः मृदुवक् बुद्धिरहितः मृदुगात्रः बली ॥ ४ ॥
शुभदृष्टे बलवान् ॥ ५ ॥
बुद्धिमान् आरोग्यवान् वाग्जालकः धनी ॥ ६ ॥
लग्नेशे बलरहिते व्याधिमान् ॥ ७ ॥
शुभदृष्टे आरोग्यवान् ॥ ८ ॥

लग्नाद्द्वितीये चन्द्रफलम्

शोभनवान् बहुप्रतापी धनवान अल्पसन्तोषि ॥ ९ ॥
अष्टादशवर्षे राजद्वरेण सेनाधिपत्योगः ॥ १० ॥
पापयुतेविद्याहीनः ॥ ११ ॥
शुभयुते बहुविद्याधनवान् ॥ १२ ॥
एकेनैवपूर्णचन्द्रेण संपूर्णधनवान् ॥ १३ ॥
अनेक विद्यावान् ॥ १४ ॥

लग्नात्तृतीये चन्द्रफलम्

भगिनीसामान्यः वातशरीरी अन्नहीनः अल्पभाग्यः ॥ १५ ॥
चतुर्विंशतिवर्षे भाविरुपेन राजदंडेन द्रव्यच्छेदः ॥ १६ ॥
गोमहिष्यादिहीनः ॥ १७ ॥
पिशुनः मेधावी सहोदर वृद्धि ॥ १८ ॥

लग्नाच्चतुर्थे चन्द्रफलम्

राज्याभिशिक्तः अश्ववान् क्षीरसमृद्धिः धनधान्यसमृद्धिः
मतृरोगी ॥ १९ ॥
परस्त्रीस्तनपानकारी ॥ २० ॥
मिष्टान्नसम्पन्नः परस्त्रीलोलः सौख्यवान् ॥ २१ ॥
पूर्णचन्द्रं स्वक्षेत्रे बलवान् मतृदीर्घयुः क्षीणचन्द्रे
पापयुते मातृनाशः ॥ २२ ॥
वाहनहीनह् बलयुते वाहनसिद्धिः ॥ २३ ॥
भावाधिपे स्वोच्चे अनेकाश्वादिवाहनसिद्धिः ॥ २४ ॥

लग्नात्पंचमे चन्द्रफलम्

स्त्रीदेवतासिद्धिः भर्यरूपवती ॥ २५ ॥
क्वचित् कोपवती ॥ २६ ॥
स्तनमध्येलंछनं भवति ॥ २७ ॥
चतुष्पादलाभः स्त्रीद्वयम् बहुक्षीरलाभः सत्त्वयुतः
बहुश्रमोत्पन्नः चिन्तावान् स्त्रीप्रजावान् एकपुत्रवान् ॥ २८ ॥
स्त्रीदेवतोपासनावान् ॥ २९ ॥
शुभयुते वीक्षणवशादनुग्रहसमर्थः ॥ ३० ॥
पापयुतेक्षणवशान्निग्रहसमर्थः ॥ ३१ ॥
पूर्णचन्द्रे बलवान् अन्नदानप्रीतिः अनेकबुधप्रसादैश्वर्यसम्पन्नः
सत्कर्मकृत् भाग्यसमृद्धिः राजयोगी जानवान् ॥ ३२ ॥

लग्नात्षष्टे चन्द्रफलम्

अधिकदारिद्र्यदेही ॥ ३३ ॥
षट्त्रिंशद्वर्षे विधवासंगमी तत्र पापयुते हीनपापकरः ॥ ३४ ॥
राहुकेतुयुते अर्थहीनः ॥ ३५ ॥
घोरः शत्रुकलहवान् सहोदरहीन अग्निमंद्यादिरोगी ॥ ३६ ॥
तटाककूपादिषु जलादिगण्डः ॥ ३७ ॥

पापयुते रोगवान् ॥ ३८॥
क्षीणचन्द्रे पूर्नफलानि ॥ ३९॥
शुभयुते बलवान् अरोगी ॥ ४०॥

लग्नात्सप्तमे चन्द्रफलम्

मृदुभाशी पार्श्वनेकः द्वात्रिंशद्वर्षे स्त्रीयुक्तः ॥ ४१॥
स्त्रीलोलः स्त्रीमूलेन ग्रंथिशस्त्रादिपीडा ॥ ४२॥
राजप्रसादलाभः ॥ ४३॥
भावाधिपे बलयुते स्त्रीद्वयम् ॥ ४४॥
क्षीणचन्द्रे कलत्रनाशः पूर्नचन्द्रे बलयुते
स्वोच्चे एकदारवान् ॥ ४५॥
भोगलुब्धः ॥ ४६॥

लग्नादष्टमे चन्द्रफलम्

अल्पवाहनवान् ॥ क्॥
तडाकादिषुगण्डः ॥ ख्॥
स्त्रीमूलेनबंधुजन परित्यागी ॥ ग्॥
स्वर्क्षे स्वोच्चे दीर्घयुः क्षीने वा मध्यमायुः ॥ घ्॥

लग्नान्नवमे चन्द्रफलम्

बहुश्रुतवन् पुण्यवान् ॥ ४७॥
तटाकगोपुरदिनिर्मण पुण्यकर्ता ॥ ४८॥
पुत्रभाग्यवान् ॥ ४९॥
पूर्णचन्द्रे बलयुते बहुभाग्यवान् ॥ ५०॥
पितृदीर्घयुः ॥ ५१॥
पापयुते पापक्षेत्रे भाग्यहीनः ॥ ५२॥
नष्टपितृमातृकः ॥ ५३॥

लग्नाद्दशमे चन्द्रफलम्

विद्यावान् ॥ ५४॥
पापयुते सप्तविंशतिवर्षे विधवासंगमेन जनविरोधी ॥ ५५॥
अतिमेधावी ॥ ५६॥

सत्यकर्मनिरतः कीर्तिमान् दयावान् ॥ ५७॥
भावाधिपे बलयुते विशेसत्कर्मसिद्धिः ॥ ५८॥
पापनिरिक्षिते पापयुते वा दुष्कृतिः ॥ ५९॥
कर्मविघ्नकरः ॥ ६०॥

लग्नादेकादशे चन्द्रफलम्

बहुश्रुतवान् पुत्रवान् उपकारि ॥ ६१॥
पंचाशद्वर्षेपुत्रर्णबहुप्राबल्ययोगः ॥ ६२॥
गुणाढ्यः ॥ ६३॥
भावाधिपे बलहीने बहुधन व्ययः ॥ ६४॥
बलयुते लाभवान् ॥ ६५॥
लाभेचन्द्रे निक्षिपलाभः ॥ ६६॥
शुक्रयुतेन नरवाहनस्योग ॥ ६७॥
बहुविद्यावान् ॥ ६८॥
क्षेत्रवान् अनेकजनरक्षणभाग्यवान् ॥ ६९॥

लग्नाद्द्वादशे चन्द्रफलम्

दुर्भोजनः दुष्पात्रव्ययः कोपोद्भवव्यसन समृद्धिमान्
स्त्रीयोगयुक्तः अन्न हीनः ॥ ७०॥
शुभयुते विद्वान् दयावान् पापशत्रुयुते पापलोकः
शुभमित्रयुते श्रेष्ठलोकवान् ॥ ७१॥

अथ तन्वादिद्वादशभावस्थित भौमफलम् तत्रादौ लग्ने भौमफलम्

देहे व्रणं भवति ॥ १॥
दृढगात्रः चौरबुभूषकः बृहन्नाभि रक्तपाणिः
शूरो बलवान् मूर्खः कोपवान् सभानशौर्य धनवान्
चापलवान् चित्ररोगी क्रोधी दुर्जनः ॥ २॥
स्वोच्चे स्वक्षेत्रे आरोग्यम् दृढगात्रवान् राजसन्मान कीर्तिः ॥ ३॥
दीर्घयुः ॥ ४॥
पापशत्रुयुते अल्पायु ॥ ५॥
स्वल्पपुत्रवान् वातशूलादिरोगः दुर्मुखः ॥ ६॥
स्वोच्चे लग्नर्क्षे धनवान् ॥ ७॥

विद्यावान् नेत्रविलासवान् ॥ ८॥
तत्र पापयुते पापक्षेत्रे पापदृश्टयुते नेत्र रोगः ॥ ९॥

लग्नाद्वितीये भौमफलम्

विद्याहीनः लाभवान् ॥ १०॥
पष्ठाधिपेनयुतः तिष्ठति चेन्नेत्रवैपरीत्यं भवति ॥ ११॥
शुभदृष्टे परिहारः ॥ १२॥
स्वोच्चे स्वक्षेत्रे विद्यावान् ॥ १३॥
नेत्र विलासः ॥ १४॥
तत्र पापयुतेक्षेत्रे पापदृष्टे नेत्ररोगः ॥ १५॥

लग्नात्तृतीये भौमफलम्

स्वस्त्री व्यभिचारिणी ॥ १६॥
शुभदृष्टे न दोष अनुजहीनः ॥ १७॥
द्रव्यलाभः ॥ १८॥
राहुकेतुयुते वेश्यासंगमः ॥ १९॥
भ्रातृद्वेषी क्लेशयुतः शुभगः ॥ २०॥
अल्पसहोदरः ॥ २१॥
पापयुते पापवीक्षणेन भ्रातृनाशः ॥ २२॥
उच्चस्वक्षेत्रे शुभयुते भ्राता दीर्घयुः धैर्यविक्रमवान् ॥ २३॥
युद्धे शूरः ॥ २४॥
पापयुते मित्रक्षेत्रे धृतिमान् ॥ २५॥

लग्नाच्चतुर्थे भौमफलम्

ग्रहच्छिद्रम् ॥ २६॥
अष्टमे वर्षे पित्रारिष्टं मातृरोगी ॥ २७॥
सौम्ययुते परगृहवासः ॥ २८॥
निरोगशरिरि क्षेत्रहीनः धनधान्यहीनः जीर्णगृहवासः ॥ २९॥
उच्चे स्वक्षेत्रे शुभयुते मित्रक्षेत्रे वाहनवान् क्षेत्रवान्
मातृदीर्घयुः ॥ ३०॥
नीचर्क्षे पापमृत्युयुते मातृनाशः ॥ ३१॥
सौम्ययुते वाहन निष्ठावान् ॥ ३२॥
बन्धुजनद्वेषी स्वदेशपरित्यागी वस्त्रहीनः ॥ ३३॥

लग्नात्पंचमे भौमफलम्

निर्धनः पुत्राभावः दुर्मार्गी राजकोपः ॥ ३४ ॥
षष्ठवर्षे आयुधेन किंचिदण्डकालः ॥ ३५ ॥
दुर्वसन जानशीलवान् ॥ ३६ ॥
मायावादी ॥ ३७ ॥
तीक्षणधीः ॥ ३८ ॥
उच्चे स्वक्षेत्रे पुत्रसमृद्धिः अन्नदान्प्रियः ॥ ३९ ॥
राजाधिकारयोगः शत्रुपीडा ॥ ४० ॥
पापयुते पापक्षेत्रे पुत्रनाशः ॥ ४१ ॥
बुद्धि भ्रंशादिरोगः ॥ ४२ ॥
रन्ध्रेशे पापयुते पापी ॥ ४३ ॥
वीरः ॥ ४४ ॥
दत्त पुत्र योगः ॥ ४५ ॥

लग्नात्षष्ठे भौमफलम्

प्रसिद्धः ॥ ४६ ॥
कार्यसमर्थः ॥ ४७ ॥
शत्रुहन्ता पुत्रवान् सप्तविंशति वर्षे कन्यकाश्वादि युत ऊढवान् ॥ ४८ ॥
शत्रुक्षयः ॥ ४९ ॥
शुभर्क्षे शुभयुते शुभदृष्टे पूर्णफलानि ॥ ५० ॥
वातशूलादिरोगः ॥ ५१ ॥
बुधक्षेत्रे युते कुष्ठरोगः ॥ ५२ ॥
शुभदृष्ते परिहारः ॥ ५३ ॥

लग्नात्सप्तमे भौमफलम्

स्वदार पीडा ॥ ५४ ॥
पापार्ते पापयुतेन च स्वर्क्षे स्वदार हानिः ॥ ५५ ॥
शुभयुते जीवति पत्यौ स्त्रीनाशः ॥ ५६ ॥
विदेशपरः ॥ ५७ ॥
उच्चमित्र स्वक्षेत्र शुभयुते पपक्षेत्रे ईक्षणवशात्कलत्र नाशः ॥ ५८ ॥
अथवा चोरव्यभिचार मूलेन कलत्रान्तरं दुष्टस्त्रीसंगः ॥ ५९ ॥
भगचुम्बनवान ॥ ६० ॥

चतुष्पाद मैथुनवान् मद्यपानाप्रियः ॥ ६१॥
मन्दयुते दृष्ते शिश्नचुंबन परः ॥ ६२॥
केतुयुते रजस्वला स्त्री सम्भोगी ॥ ६३॥
तत्रशत्रुयुते बहुकलत्रनाशः ॥ ६४॥
अवीरः अहंकारी वाशुभदृष्टे न दोषः ॥ ६५॥

लग्नादष्टमे भौमफलम्

नेत्ररोगी अर्धायुः पित्ररिष्टं मूत्रकृच्छ्ररोगः ॥ ६६॥
अल्पपुत्रवान् वातशूलादिरोगः दारसुखयुतः ॥ ६७॥
शुभयुते देहारोग्याम् दीर्घयु मुनष्यादि वृद्धिः ॥ ६८॥
पापक्षेत्रे पापयुते ईक्षणवशाद्वात क्ष्यादि रोगः
पूत्रकृच्छ्रधिक्यं वा ॥ ६९॥
मध्यमायुः ॥ ७०॥
भावाधिपबलयुते पूर्नायुः ॥ ७१॥

लग्नान्नवमे भौमफलम्

पित्रारिष्टम् ॥ ७२॥
भाग्यहीनः ॥ ७३॥
उच्चस्वक्षेत्रे गुरुदारगः ॥ ७४॥

लग्नाद्दशमे भौमफलम्

जनवल्लभः ॥ ७५॥
भावाधिपे बलयुते भ्राता दीर्घयुः ॥ ७६॥
विशेश भाग्यवान् ध्यानशीलवान् गुरुभक्ति युतः ॥ ७७॥
पापयुते कर्मविघ्नवान् ॥ ७८॥
शुभयुते शुभक्षेत्रे कर्मसिद्धिः ॥ ७९॥
कीर्तिप्रतिश्ठावान् अष्टादशवर्षे द्रव्यार्जन समर्थः ॥ ८०॥
सर्वसमर्थः दृढगात्र चोरबुद्धिः पापयुते
पापक्षेत्रे कर्मविघ्नकरः ॥ ८१॥
दुष्कृतिः ॥ ८२॥
भाग्येश कर्मेशयुते महाराजयौवराज्ये पत्ताभिषेकवान् ॥ ८३॥
गुरुयुते गजान्तैश्वर्यवान् ॥ ८४॥
बूसमृद्धिमान् ॥ ८५॥

लग्नादेकदश भौमफलम्

बहुकृत्यवान् धनी स्वगुने राशुलाभवान् ॥ ८६ ॥
क्षेत्रेशयुते राजाधिपत्यवान् ॥ ८७ ॥
शुभद्वययुते माहाराजाधिपत्ययोगः ॥ ८८ ॥
भ्रातृवित्तवान् ॥ ८९ ॥

लग्नाद्द्वादशे भौमफलम्
द्रव्याभावः वातपित्तदेहः ॥ ९० ॥
पापयुते दाम्भिकः ॥ ९१ ॥

अथ तन्वादि द्वादश भावस्थित बुधफलमाह

तत्रादौ लग्ने बुधफलम्

विद्यावान् विवाहादिबहुश्रुतवान् ॥ १ ॥
अनेकदेशे सार्वभौमः मन्त्रवादी पिशाच्छोच्चाटन
समर्थः मृदुभाषी विद्वान् क्षमीदयावान् ॥ २ ॥
सप्तविंशतिवर्षे तीर्थयात्रायोगः बहुलाभवान् बहुविद्यावान् ॥ ३ ॥
पापयुते पापक्षेत्रे देहेरोगः पित्तपांडुरोगः ॥ ४ ॥
शुभयुते शुभक्षेत्रे देहारोग्यम् ॥ ५ ॥
स्वर्णकान्तिदेहः ज्योतिषशस्त्र पठितह् अंगहीनः
सज्जनद्वेषी नेत्ररोगी ॥ ६ ॥
सप्तदशवर्षे भ्रातृणामन्योन्यकलहः ॥ ७ ॥
वंचकः ॥ ८ ॥
उच्चस्वक्षेत्रे भ्रातृसौख्यम् ॥ ९ ॥
श्रेष्ठलोकं गमिष्यति ॥ १० ॥
पापयुते पापदृष्टयुते नीचर्क्षे पापलोकं गमिष्यति ॥ ११ ॥
शय्यासुखवर्जितः क्षुद्रदेवतोपासकः ॥ १२ ॥
पापमंदादियुते वामनेत्रे हानिः षष्ठेशयुते
नीचेशयुते वा न दोषः ॥ १३ ॥
अपात्रव्ययवान् ॥ १४ ॥
पापहा ॥ १५ ॥

शुभयुते निश्चयेन धनधान्यादिमान् धार्मिक बुद्धिः ॥ १६ ॥
अस्त्रवित् गणितशास्त्रजः सौख्यवान् तर्कशास्त्रवित्दृढ गात्रः ॥ १७ ॥

लग्नाद् द्वितीये बुधफलम्

पुत्र समृद्धिः वाचालकः वेदशस्त्रविचक्षणः
संकल्पसिद्धया संयुतः धनी गुणाढ्यः सद्गुणी
पंचदशवर्षे बहुविद्यावान् ॥ १८ ॥
बहुलाभप्रदः ॥ १९ ॥
पापयुते पापक्षेत्रे अरिनीचगे विद्याविहीनः ॥ २० ॥
क्रूरत्ववान् पवनव्याधिः ॥ २१ ॥
शुभयुतेवीक्षणाद्धनी ॥ २२ ॥
विद्यावान् ॥ २३ ॥
गुरुणा युते वीक्षिते वा गणितशास्त्राधिकारेन सम्पन्नः ॥ २४ ॥

लग्नात् तृतीये बुधफलम्

भ्रातृमान् बहुसौख्यवान् ॥ २५ ॥
पंचदशवर्षे क्षेत्रपुत्रयुतः ॥ २६ ॥
धनलाभवान् ॥ २७ ॥
सद्गुणशाली ॥ २८ ॥
भावाधिपे बलयुते दीर्घयुः धैर्यवान् ॥ २९ ॥
भावाधिपे भ्रातृपीडा भीतिमान् ॥ ३० ॥
बलयुते भ्राता दीर्घयुः ॥ ३१ ॥

लग्नाच्चतुर्थे बुधफलम्

हस्तचापल्यवान् धैर्यवान् विशालाक्षः पितृमतृसौख्ययुतः ॥ ३२ ॥
जानवान् सुखी ॥ ३३ ॥
शोडशवर्षे द्रव्यापहाररूपेण अनेक वाहनवान् ॥ ३४ ॥
भावाधिपे बलयुते आन्दोलिका प्राप्तिः ॥ ३५ ॥
राहुकेतुशनियुते वाहनारिष्टवान् ॥ ३६ ॥
क्षेत्रसुखवर्जितः बन्धुकुलद्वेषी कपटी ॥ ३७ ॥

लग्नात्पंचमे बुधफलम्

मातुलगण्डःमात्रदिसौख्यंपुत्र विघ्नमेधवी
मधुरभाषी बुद्धिमान् ॥ ३८॥
भावाधिपे पापयुते बलहीने पुत्रनाशः ॥ ३९ ॥
अपुत्र दत्तपुत्रप्राप्तिः पापकर्मी मंत्रवादी ॥ ४०॥

लग्नात्षष्ठे बुधफलम्

राजपूज्यः विद्याविघ्नः दाम्भिकः विवादशूरः ॥ ४१॥
त्रिंशद्वर्षे बहुराजस्नेहो भवति ॥ ४२॥
पत्रादिलोखकः ॥ ४३॥
कुजर्क्षे नीलकुष्ठादिरोगी ॥ ४४॥
शनिराहुयुते केतुयुते वातशूलादिरोगी जातिशत्रुकलहः ॥ ४५॥
भावाधिपे बलयुते जातिप्रबलः ॥ ४६॥
अरिनीचर्क्षे जातिक्षयः ॥ ४७॥

लग्नात्सप्तमे बुधफलम्

मातृसौख्यम् अश्वाद्यारूढो धर्मजः उदारमतिः ॥ ४८॥
दिगन्तविश्रुतिकीर्तिः राजपूज्यः ॥ ४९॥
तत्रशुभयुते चतुर्विंशतिवर्षे आन्दोलिकाप्राप्तिः ॥ ५०॥
कलत्रमतिः ॥ ५१॥
अभक्ष्यभक्षणः ॥ ५२॥
भावेशे बलयुते एकदारवान् ॥ ५३॥
दारेशे दुर्बले पापे पापर्क्षे कुजादियुते कलत्रनाशः ॥ ५४॥
स्त्रीजातके पतिनाशः कलत्रं कुष्ठरोगी ॥ ५५॥
अरूपवत् ॥ ५६॥

लग्नादष्टमे बुधफलम्

आयुकारकः बहुक्षेत्रेवान् ॥ ५७॥
सप्तपुत्रवान् ॥ ५८॥
पंचविंशतिवर्षे अनेकप्रतिष्ठासिद्धिः ॥ ५९॥
कीर्तिप्रसिद्धिः ॥ ६०॥
भावाधिपे बलयुतेपूर्नयुः ॥ ६१॥
अरिनीचपापयुते अल्पायुः ॥ ६२॥
अथवा उच्चस्वक्षेत्रे वा शुभयुते पूर्णयुः ॥ ६३॥

लग्नान्नवमे बुधफलम्

बहुप्रजासिद्धिः ॥ ६४ ॥
वेदशास्त्रविशारदः संगीत पाठकः दाक्षिण्यवान्
धार्मिकः प्रतापवान् बहुलाभवान् पितृ दीर्घयुः ॥ ६५ ॥
तपोध्यानशीलवान् ॥ ६६ ॥

लग्नाद्दशमे बुधफलम्

सत्कर्मसिद्धिः भैर्यवान् बहुलकीर्तिमान् बहुचितवान् ॥ ६७ ॥
अष्टाविंशतिवर्षे नेत्ररोगवान् ॥ ६८ ॥
उच्चस्वक्षेत्रे गुरुयुतेऽग्निष्टोमादि बहुकर्मवान् ॥ ६९ ॥
अरिपापयुते मूढकर्मविघ्नवान् दुष्कृतिः अनाचारः ॥ ७० ॥

लग्नादेकादशे बुधफलम्

बहुमंगलप्रदः ॥ ७१ ॥
अनेक प्रकारेण धनवान् ॥ ७२ ॥
एकोनविंशतिवर्षदुपरि क्षेत्रपुत्रधनवान् दयावान् ॥ ७३ ॥
पापर्क्षे पापयुते हीनमूलेन धनलोपः ॥ ७४ ॥
उच्चस्वक्षेत्रे शुभमूलेन धनवान् ॥ ७५ ॥

लग्नाद्द्वदशे बुधफलम्

जानवान् ॥ ७६ ॥
वितरणशाली ॥ ७७ ॥
पापयुते चंचलंचित्तः ॥ ७८ ॥
नृपज्नद्वेषी ॥ ७९ ॥
शुभयुतेन धर्ममूलेन धनव्ययः ॥ ८० ॥
विद्याहीनः ॥ ८१ ॥

अत्र तन्वादिद्वादशभावस्थित गुरूफलमाह

तत्रादौ लग्ने गुरुफलम्

स्वक्षेत्रे शब्दशास्त्राधिकारी ॥ १॥
त्रिवेदी बहुपुत्रवान् सुखी चिरायुः जानवान् ॥ २॥
उच्चे पूर्नफलानि ॥ ३॥
षोडशवर्षे महाराजयोगः ॥ ४॥
अरिनीचपापानां क्षेत्रे पापायुते वा नीचकर्मवान् ॥ ५॥
मनश्चलत्ववान् मध्यायुः पुत्रहीनः स्वजनपरित्यागी
कृतघ्नः गर्विश्ठः बहुजनद्वेषी सांचरवान् पापक्लेशभोगी ॥ ६॥

लग्नाद् द्वितीये गुरुफलम्

धनवान् बुद्धिमान् इष्टभाषी षोडशवर्षे धनधान्यसमृद्धिः
बहुप्राबल्यवान् उच्चस्वक्षेत्रे धनुषि द्रव्यमान् ॥ ७॥
पापयुते विद्याविघ्नः ॥ ८॥
चोरवंचनवान् दुर्वचनः अनृतप्रियः ॥ ९॥
नीचक्षेत्रे पापयुते मद्यपानी भ्रष्टः ॥ १०॥
कुलनाशकः ॥ ११॥
कलत्रान्तरयुक्तः पुत्रहीनः ॥ १२॥

लग्नात्तृतीये गुरुफलम्

अतिलुब्धः भ्रातृवृद्धिः दाक्षिण्यवान् संकल्प सिद्धिकरः ॥ १३॥
बन्धुदोषकरः ॥ १४॥
अष्टशत्रिंद्वर्षे यात्रासिद्धिः ॥ १५॥
भावाधिपे बलयुते भ्रातृदीर्घयुः ॥ १६॥
भावाधिपे पापयुते भ्रातृनाशः ॥ १७॥
भैर्यहीनः जदबुद्धिः दरिद्रः ॥ १८॥

लग्नाच्चतुर्थे गुरुफलम्

सुखी क्षेत्रेवान् बुद्धिमान् क्षीरसमृद्धिः सन्मनाः मेधावी ॥ १९॥
भावाधिपे बलयुते भृगुचन्द्रयुक्ते शुभवर्गेन नरवाहनयोगः ॥ २०॥
बहुक्षेत्रः अश्ववाहनयोगः गृहविस्तरवान् ॥ २१॥
पापयुतः पापिनः दृष्टवशात् क्षेत्रवाहनहीनः ॥ २२॥
परगृहवासः क्षेत्रहीनः मातृनाशः बन्धुद्वेषी ॥ २३॥

लग्नात्पंचमे गुरुफलम्

बुद्धिचातुर्यवान् विशालेक्षणः वाग्मी प्रतापी अन्नदानप्रियः
कुलप्रियः अष्टादशवर्षे राजद्वारेण सेनाधिपत्य योगः ॥ २४ ॥
पुत्रसमृद्धिः ॥ २५ ॥
भावाधिपे बलयुते पापक्षेत्रे अरिनीचगे पुत्रनाशः ॥ २६ ॥
एकपुत्रवान् ॥ २७ ॥
धनवान् ॥ २८ ॥
राजद्वारे राजमूलेन धनव्ययः ॥ २९ ॥
रहुकेतुयुते सर्पशापात् सुतक्षयः ॥ ३० ॥
शुभदृष्टे परिहारः ॥ ३१ ॥

लग्नात्षष्ठे गुरुफलम्

शत्रुक्षयः जातिवृद्धिः पौत्रादिदर्शनं व्रणशरीरः
शुभयुते रोगाभावः ॥ ३२ ॥
पापयुते पापक्षेत्रे वातशैत्यादिरोगः ॥ ३३ ॥
मन्दक्षेत्रे राहुयुते महारोगः ॥ ३४ ॥

लग्नात्सप्तमे गुरुफलम्

विद्याधनेशः बहुलाभप्रदः चिन्ताधिकः विद्यवान्
पातिव्रत्यभक्तियुतकलत्रः ॥ ३५ ॥
भावाधिपे बलहीने राहुकेतुशनिकुजयुते
पापवीक्षणाद्बकलत्रान्तरम् ॥ ३६ ॥
शुभयुते उच्चस्वक्षेत्रे एकदारवान् कलत्रद्वारा बहुवित्तवान् सुखी
चतुस्त्रिम्शद्वर्षे प्रतिष्ठासिद्धिः ॥ ३७ ॥

लग्नादष्टमे गुरुफलम्

अल्पायुः नीचकृत्यकारी ॥ ३८ ॥
पापयुते पतितः ॥ ३९ ॥
भावाधिपे सुभयुते रन्ध्रे दीर्घयुः ॥ ४० ॥
बलहीने अल्पायुः ॥ ४१ ॥
पापयुते सप्तदशवर्षदुपरि विधवासंगमो भवति ॥ ४२ ॥
उच्चस्वक्षेत्रे दीर्घयुः बलहीनः अरोगी योगपौरुषः विद्वान्
वेदशास्त्रविचक्षणः ॥ ४३ ॥

लग्नान्नवमे गुरुफलम्

धार्मिकः ॥ ४४ ॥
तपस्वी साधुतारूढः धनिकः पंचत्रिंशद्यजकर्ता पित्रुदीर्घयुः
सत्कर्मसिद्धिः अनेकप्रतिष्ठावान् बहुजनपालकः ॥ ४५ ॥

लग्नाद्दशमे गुरुफलम्

धार्मिक शुभकर्मकारी गीतापाठकः योग्यतावान् प्रौढकीर्तिः
बहुजनपूज्यः ॥ ४६ ॥
भावाधिपे बलयुते विशेषक्रतुसिद्धिः ॥ ४७ ॥
पापयुते पापक्षेत्रे कर्मविघ्नः ॥ ४८ ॥
दुष्कृतियात्रालाभहीनः ॥ ४९ ॥

लग्नादेकादशे गुरुफलम्

विद्वान् धनवान् बहुलाभवान् द्वात्रिंशद्वर्षे अश्वारूढः ॥ ५० ॥
अनेक प्रतिष्ठासिद्धिः ॥ ५१ ॥
शुभपापयुते गजलाभः ॥ ५२ ॥
भाग्यवृद्धिः चन्द्रयुते निक्षेपलाभः ॥ ५३ ॥

लग्नाद्द्वादशे गुरुफलम्

निर्धनः पठितः अल्पपुत्रः गणितशास्त्रजः सम्भोगी ॥ ५४ ॥
ग्रन्थिव्रणी अयोग्यः ॥ ५५ ॥
शुभयुते उच्चस्वक्षेत्रे स्वर्गलोकप्राप्तिः ॥ ५६ ॥
पापयुते पापलोकप्राप्तिः ॥ ५७ ॥
धर्ममूलेन धनव्ययः ब्राह्मणस्त्रीसम्भोगी गर्भिनीसम्भोगमी ॥ ५८ ॥

अथ तन्वादिद्वादश भावस्थित भृगुफलमाह
तत्रादौ लग्ने भृगुफलम्

गणितशास्त्रजः ॥ १ ॥
दीर्घयुः दारप्रियः वस्त्रालंकारप्रियः रूपलावण्यप्रियः गुणवान् ॥ १२ ॥

स्त्रीप्रियः धनीविद्वान् ॥ ३॥
शुभयुते अनेक भूषणवान् ॥ ४॥
स्वर्णकान्तिदेहः ॥ ५॥
पापवीक्षतयुते नीचास्तगते चोरवंचनवान् ॥ ६॥
वातश्लेष्मादिरोगवान् ॥ ७॥
भावाधिपे राहुयुते बृहद्विद्बीजो भवति ॥ ८॥
वाहने शुभयुते गजान्तैश्वर्यवान् ॥ ९॥
स्वक्षेत्रे महाराजयोगः ॥ १०॥
रन्ध्रे षष्ठाव्ययाधिपेशुक्रे दुर्बले स्त्रीद्वयं ॥ ११॥
चंचलभाग्यः ॥ १२॥
क्रूरबुद्धिः ॥ १३॥

लग्नाद् द्वितीये भृगुफलम्

धनवान् कुटुम्बी सुखोजनः विनयवान् ॥ १४॥
नेत्रे विलासधनवान् सुमुखः ॥ १५॥
द्यावान् परोपकारी ॥ १६॥
द्वत्रिंषद्वर्षे उत्तमस्त्रीलाभः ॥ १७॥
भावाधिपे दुर्बलः दुःस्थाने नेत्रवपरीत्यं भवति ॥ १८॥
शशियुते निशान्धः कुटुम्बहीनो नेत्ररोगी धननाशकरः ॥ १९॥

लग्नात्तृतीये भृगुफलम्

अतिलुब्धः दाक्षिण्यवान् भ्रातृवृद्धिः संकल्पसिद्धिः पश्चात्
सहोदराभावः ॥ २०॥
क्रमेण भ्रातृतत्परः वित्तभोगपरः ॥ २१॥
भावाधिपे बलयुते उच्चस्वक्षेत्रे भ्रातृवृद्धिः दुःस्थाने
पापयुते भ्रातृनाशः ॥ २२॥

लग्नाच्चतुर्थे भृगुफलम्

शोभनवान् बुद्धिमान् भ्रातृसौख्यं सुखी क्षमावान् ॥ २३॥
त्रिंशद्वर्षे अश्ववाहनप्राप्तिः ॥ २४॥
क्षीरसमृद्धिः भावाधिपे बलयुते
अश्वान्दोलिकाकनकचतुरंगादिदृद्धिः ॥ २५॥
तत्रपापयुते पापक्षेत्रे अरिनीचगे बलहीने क्षेत्रेवाहनहीनः ॥ २६॥

मातृक्लेशवान् ॥ २७ ॥
कलत्रान्तरभोगी ॥ २८ ॥

लग्नात्पंचमे भृगुफलम्

बुद्धिमान् मंत्री सेनापतिः ॥ २९ ॥
मातामही दृश्वायौवनदार पुत्रवान् ॥ ३० ॥
राजसन्मानी मंत्री सुजः स्त्रीप्रसन्नतावृद्धिः ॥ ३१ ॥
तत्रपापयुते पापक्षेत्रे अरिनीचगे बुद्धिजाड्ययुतः पुत्राशः ॥ ३२ ॥
तत्रशुभयुते बुद्धिमान् नीतिमत्पुत्रसिद्धिः वाहनयोगः ॥ ३३ ॥

लग्नाषष्ठे भृगुफलम्

जातिप्रजासिद्धि शत्रुक्षयह् पुत्रपौत्रवान् ॥ ३४ ॥
अपात्रव्ययकारी मायावादी रोगवान् आर्यपुत्रवान् ॥ ३५ ॥
भावाधिपे बलयुते शत्रुजातिर्द्धिः शत्रुपापयुते नीचस्थे
भावेशेन्दुस्थे शत्रुजातिनाशः ॥ ३६ ॥

लग्नात्सप्तमे भृगुफलम्

अतिकामिकः मुखचुम्बकः ॥ ३७ ॥
अर्थवान् परदाररतः वाहनवान् सकलकार्यनिपुणः स्त्रीद्वेषी
सत्प्रधान जनबन्धुकलत्रः ॥ ३८ ॥
पापयुते शत्रुक्षेत्रे अरिनीचगे कलत्रनाशः ॥ ३९ ॥
विवाहद्वयम् ॥ ४० ॥
बहुपापयुते अनेककलत्रान्तर प्राप्तिः ॥ ४१ ॥
पुत्रहीनः ॥ ४२ ॥
शुभयुते उच्चे स्वक्षेत्रे तुले कलत्रदेशे बहुवित्तवान् ॥ ४३ ॥
कलत्रमूलेन बहुप्राबल्ययोगः स्त्रीगोष्ठिः ॥ ४४ ॥

लग्नादष्टमे भृगुफलम्

सुखी चतुर्थे वर्षे मातृगन्डः ॥ ४५ ॥
अर्धयुः रोगीहितदारवान् असन्तुष्टः ॥ ४६ ॥
शुभक्षेत्रे पुर्णयुः ॥ ४७ ॥
तत्र पापयुते अल्पायुः ॥ ४८ ॥

लग्नान्नवमे भृगुफलम्

धर्मिकः तपस्वी अनुष्ठनपरः ॥ ४९ ॥
पादेबहूत्तमलक्षणः धर्मी भोगवृद्धिः सुतदारवान् ॥ ५०॥
पितृ दीर्घयुः ॥ ५१॥
तत्र पापयुते पित्ररिष्टवान् ॥ ५२॥
पापयुते पापक्षेत्रे अरिनीचगे धनहानिः ॥ ५३॥
गुरुदारगः ॥ ५४॥
शुभयुते भाग्यवृद्धिः ॥ ५५॥
महाराजयोगः ॥ ५६॥
वाहनकामेशयुते महाभाग्यवान् अश्वान्दोल्यादि वाहनवान् ॥ ५७॥
वस्त्रालंकारप्रियः ॥ ५८॥

लग्नाद्दशमे भृगुफलम्

बहुप्रतापवान् पापयुते कर्मविघ्नकरः
गुरुबुधचन्द्रयुते अनेकवाहनारोहणवान् ॥ ५९॥
अनेकऋतुसिद्धिः ॥ ६०॥
दिगन्तविश्रुतकीर्तिः अनेकराजयोगः बहुभाग्यवान् वाचालः ॥ ६१॥

लग्नादेकादशे भृगुफलम्

विद्वान् बहुधनवान् भूमिलाभवान् दयावान् शुभयुते
अनेक वाहनयोगः ॥ ६२॥
पापयुते पापमूलद् धनलाभः ॥ ६३॥
शुभयुते शुभमुलात् नीचर्क्षे पापरन्ध्रेशादियोगे लाभहीनः ॥ ६४॥

लग्नाद्द्वादशे भृगुफलम्

बहुलदारिद्रयवन् ॥ ६५॥
पपयुते विषयलुब्धपरः ॥ ६६॥
शुभयुक्तश्चेत् बहुधनवान् ॥ ६७॥
श्य्याखट्वंगादिसौख्यवान् शुभलोकप्राप्तिः
पापयुते नरकप्राप्तिः ॥ ६८॥

अथ तन्वादिद्वादश भावस्थित शनिफलमाह
तत्रादौ लग्ने शनिफलम्

वातपित्तदेहः ॥ १॥
उच्चे पुरग्रामाधिपः धनधान्य समृद्धिः ॥ २॥
स्वर्क्षे पितृधनवान् ॥ ३॥
वाहनेशकर्मेशक्षेत्रे बहुभाग्यम् ॥ ४॥
महाराजयोगः ॥ ५॥
चन्द्रमसा दृष्टे भिक्षुकी वृत्तः ॥ ६॥
शुभदृष्टे निवृत्तः ॥ ७॥

लग्नाद् द्वितीये शनिफलम्

द्रव्याभावः दारद्वयम् ॥ ८॥
पापयुते दारवंचनामठाधिपः अल्पक्षेत्रवान् नेत्ररोगी ॥ ९॥

लग्नात्तृतीये शनिफलम्

भ्रातृहानिकारकः ॥ १०॥
अदृष्टः दुर्वृत्तः ॥ ११॥
उच्चस्वक्षेत्रे भ्रातृवृद्धिः ॥ १२॥
तत्रपापयुते भ्रातृद्वेषी ॥ १३॥

लग्नाच्चतुर्थे शनिफलम्

मातृहानिः द्विमातृवान् ॥ १४॥
सौख्यहानिः निर्धनः ॥ १५॥
उच्चस्वक्षेत्रे न दोशः ॥ १६॥
अश्वान्दीलाद्यवरोही ॥ १७॥
लग्नेशेमन्दे मातृदीर्घयुः ॥ १८॥
सौख्यवान् ॥ १९॥
रन्ध्रेशयुक्ते मत्ररिष्टम् ॥ २०॥
सुखहानिः ॥ २१॥

लग्नात्पंचमे शनिफलम्

पुत्रहीनः अतिदरिद्री दुर्वृत्तः दत्तपुत्री ॥ २२॥
स्वक्षेत्रे स्त्रीप्रजासिद्धिः ॥ २३॥
गुरुदृष्टे स्त्रीद्वयम् ॥ २४॥
तत्र प्रथमापुत्रा द्वितीया पुत्रवती ॥ २५॥
बलयुते मन्दे स्त्रीभिर्युक्तः ॥ २६॥

लग्नात्षष्ठे शनिफलम्

अल्पजातिः शत्रुक्षयः ॥ २७॥
धनधान्यसमृद्धिः कुजयुते देशान्तर संचारी ॥ २८॥
अल्पराजयोगः ॥ २९॥
भंगयोगात्क्वचित्सौख्यक्वचिद्योगभंगः ॥ ३०॥
रन्ध्रेशे मंदे अरिष्टं वातरोगी शूलव्रणदेही ॥ ३१॥

लग्नात्सप्तमे शनिफलम्

शनीरदोषकरः कृशकलत्रः वेश्यासम्भोगवान् अतिदुखी
उच्चस्वक्षेत्रेगते अनेकस्त्रीसम्भोगी ॥ ३२॥
केतुयुते स्त्रीसम्भोगी ॥ ३३॥
कुजयुते शिश्नचुम्बनपरः ॥ ३४॥
शुक्रयुते भगचुम्बनपरः ॥ ३५॥
परस्त्रीसम्भोगी ॥ ३६॥

लग्नादष्टमे शनिफलम्

त्रिपादायुः दरिद्री शूद्रस्त्रीरतः सेवकः ॥ ३७॥
उच्चस्वक्षेत्रे दीर्घयुः ॥ ३८॥
अरिनीचगे भावाधिपे अल्पायुः ॥ ३९॥
कष्टान्नभोगी ॥ ४०॥

लग्नान्नवमे शनिफलम्

पतितः जीर्णोद्धारकरः एकोनचत्वारिंशद्वर्षे
तटाकगोपुरनिमर्णकर्त्ता ॥ ४१॥
उच्चस्वक्षेत्रे पितृदिर्घयुः ॥ ४२॥

पापयुते दुर्बले पित्ररिष्टवान् ॥ ४३॥

लग्नाद्दशमे शनिफलम्

पंचविंशतिवर्षे गंगास्नायी अतिलुब्धः पित्तशरीरी ॥ ४४॥
पापयुते कर्मविघ्नकरः शुभयुते कर्मसिद्धिः ॥ ४५॥

लग्नादेकादशे शनिफलम्

बहुधनी विघ्नकरः भूमिलाभः राजपूजकः ॥ ४६॥
उच्चे स्वक्षेत्रे वा विद्वान् ॥ ४७॥
महाभाग्ययोगः बहुधनी वाहनयोगः ॥ ४८॥

लग्नाद्द्वादशे शनिफलम्

पतितः विकलंगः ॥ ४९॥
पापयुते नेत्रच्छेदः ॥ ५०॥
शुभयुते सुखी सुनेत्रः पुण्यलोकप्राप्तिः ॥ ५१॥
पापयुते नरक प्राप्तिः ॥ ५२॥
अपात्रव्ययकारी निर्धनः ॥ ५३॥

अथ तन्वादिद्वादश भावस्थित राहुकेत्वोः फलमाह

तत्रादौ लग्ने राहुकेत्वोः फलम्

मृतप्रसूतिः ॥ १॥
मेषवृषभकर्कराशिस्थे दयावान् ॥ २॥
बहुभोगी ॥ ३॥
अशुभे शुभदृष्टे मुखलंञ्छनी ॥ ४॥

लग्नाद्द्वितीये राहुकेत्वोः फलम्

निर्धनः देहव्याधिः पुत्रशोकः श्यामवर्णः ॥ ५॥
पापयुते चुबुके लाम्ञ्छनम् ॥ ६॥

लग्नात्तृतीये राहुकेत्वोः फलम्

तिलनिष्पावमुद्रकोद्रवसमृद्धिवान् ॥ ७॥
शुभयुते कंठलांछनम् ॥ ८॥

लग्नाच्चतुर्थे राहुकेतुफलम्

बहुभूषणसमृद्धिः जायाद्वयं सेवकः
मातृक्लेशः पापयुते निश्चयेन ॥ ९॥
शुभयुतदृष्टे न दोषः ॥ १०॥

लग्नात्पंचमे राहुकेत्वोः फलम्

पुत्राभावः सर्वशापात् सुतक्षयः ॥ ११॥
नाग प्रतिष्ठया पुत्रप्राप्तिः ॥ १२॥
पवनव्याधिः दुर्मर्गी राजकोपः दुष्टग्रामवासी ॥ १३॥

लग्नात्षष्ठे राहुकेत्वोः फलम्

धीरवान् अतिसुखी ॥ १४॥
इन्दुयुते राजस्त्रीभोगी ॥ १५॥
निर्धनः चोरः ॥ १६॥

लग्नात्सप्तमे राहुकेत्वोः फलम्

दारद्वयं तन्मध्ये प्रथमस्त्रीनाशः द्वितीए कलत्रे गुल्मव्याधिः ॥ १७॥
पापयुते गण्डोत्पत्तिः ॥ १८॥
शुभयुते गण्डनिवृत्तिः ॥ १९॥
नियमेन दारद्वयम् ॥ २०॥
शुभयुते एकमेव ॥ २१॥

लग्नादष्टमे राहुकेत्वोः फलम्

अतिरोगी द्वत्रिंशद्वर्षयुष्मान ॥ २२॥
शुभयुते पञ्चचत्वारिंशद्वर्षे भावाधिपे बलयुते
स्वोच्चेषष्टिवर्षणिवा जीवितम् ॥ २३॥

लग्नान्नवमे राहुकेत्वोः फलम्

पुत्रहीनः शूद्रस्त्रीसम्भोगी सेवकः धर्महीनः ॥ २४॥

लग्नाद्दशमे राहुकेत्वोः फलम्

वितन्तुसंगमः ॥ २५॥
दुर्ग्रामवासः ॥ २६॥
शुभयुते न दोषः ॥ २७॥
काव्यव्यसनः ॥ २८॥

लग्नादेकादशे राहुकेत्वोः फलम्

पुत्रिः समृद्धिः ॥ २९॥
धनधान्यसमृद्धिः ॥ ३०॥

लग्नाद्द्वादशे राहुकेत्वोः फलम्

अल्पपुत्रः ॥ ३१॥
नेत्ररोगी पापगतिः ॥ ३२॥

---

Encoded by Radu Canahai clradu at yahoo.com

---

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010
http://sanskritdocuments.org